# वेदेषु ग्रहणविमर्शः

**डॉ. अशोकथपलियालः**
ज्योतिषव्याख्याता (असि0प्रो0)
रा. सं. सं.भोपालनगरम्, मध्यप्रदेशः

प्राचीनकालादेव मानवः आकाशनिरीक्षणं प्रति समुत्सुको दृश्यते। वैदिक-ऋषिभिरपि कौतूहलेन आकाशीयग्रह- तारकाणां गतिस्थितिविषये अध्ययनमारब्धम्। खगोले ग्रहनक्षत्राणां दैनन्दिनं दर्शनातिरिक्तमपि केचन आश्चर्योत्पादकाः चमत्काराः यदा कदा दृश्यन्ते । तेषु धूमकेतूल्कापातादय अनेका आश्चर्यजनकघटनाः न केवलं विस्मयोत्पादकाः अपितु अबोधजनानां मनसि भयमप्युत्पादयन्ति। अस्माकमृषयः आचार्याश्च ग्रहनक्षत्रा- दीनामध्ययनेन सह तासामपि सततं वेधं कृतवन्तः। प्राचीनभारतीयवाङ्मये अनेकेषु स्थलेषूल्कापातधूमकेत्वादीनां वर्णनमस्य प्रमाणम्। तासु खगोलीयाश्चर्यजनकघटनासु ग्रहणमन्यतमम्। कस्यापि खगोलपिण्डस्य दर्शने अपरखगोल- पदार्थेन कृतं व्यवधानमेव ग्रहणम्। पृथिवीतः दृश्यमानानि ग्रहणानि तु द्विविधम् - सूर्यग्रहणं चन्द्रग्रहणं चेति। सूर्यस्य दर्शने चन्द्रकृतव्यवधानं सूर्यग्रहणम्। यदा च चन्द्रस्य दर्शने भूच्छाया बाधामुत्पादयति तदा तु चन्द्रग्रहणमिति स्पष्टमेव। वैदिककाले ग्रहणस्य ज्ञानमुन्नतावस्थायामासीत्। वेदेषु ज्योतिषशास्त्रस्य बीजमेव लभ्यते न तु तस्य व्याख्यानम्। अतः ग्रहणविषयेऽपि यद्यपि तत्र सूक्ष्मदृष्टिः न प्राप्यते परन्तु यज्ञधर्मदर्शनादिविषयाणां विवेचनसमये प्रसङ्गवशादेव ग्रहणस्य यत्किंचिदपि वर्णनमुपलभ्यते तत्सर्वं तज्ज्ञत्वस्य प्रमाणम्। सूर्यग्रहणं त्वमावस्यायां तथा च चन्द्रग्रहणं पौर्णमास्यां भवतीति वैदिक-ऋषिभिः परिज्ञातमेवासीत्। अमावस्यायां सूर्याचन्द्रौ एकस्मिन्नेव राश्यादिके स्थितौ भवत इति ज्ञात्वा तत्र भणितमस्ति-

**चन्द्रमा अमावस्यायामादित्यमनुप्रविशति............. आदित्याद्वै चन्द्रमा जायते।।**[1]

अतः सूर्यग्रहणस्य कारकेषु चन्द्रोऽपि महत्त्वपूर्णमस्तीति सम्भवतः तदा ज्ञातमासीत्। ऋग्वेदे सूर्यग्रहणस्य विषये किंचिद्विशिष्टवर्णनं समुपलभ्यते। यथा - **यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः। अक्षेत्रविद्यथामुग्धो भुवनान्यदीधयुः।। स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्त्तमाना अवाहन्। गूळहं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाऽविन्ददत्रिः।। मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत् ।त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा।। ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन्। अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत्।। यं वै सूर्यं स्वभानुस्तमसाविध्यदासुरः।अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन्।।**[2] उपर्युक्तमंत्रस्यानुशीलनेन निम्नबिन्दवः समुत्पद्यन्ते-

1. अत्र स्वर्भानुः सूर्यं तमसा आच्छादितवान् अर्थात् राहुः सूर्यग्रहणस्य कारक इति वर्णितमस्ति। अनेन स्पष्टं यत् राहुकृतग्रहणस्य कल्पना वैदिककालादेव दृश्यते । कल्पनेयं लाक्षणिकरूपा। वस्तुतः यदा क्रान्तिवृत्तचन्द्रविमण्डलयोः सम्पातयोरासन्नप्रदेशे (राहुकेतुसंज्ञकपातयोः सन्निकटः) सूर्याचन्द्रौ भूमण्डलेन दृश्येते तदैव ग्रहणस्य सम्भावना भवति। 'स्वर्भानु तमसा विध्यदासुरः' इत्यनेन स्वर्भानोस्तमसश्च पार्थक्यमपि सिध्यति। यद्यपि ज्योतिषशास्त्रस्य जातकग्रन्थेषु प्रायः राहुकृत एव तमश्शब्दस्य प्रयोगः दृश्यते।

2. उपर्युक्तमंत्रे खग्राससूर्यग्रहणस्य वर्णनं प्रतीयते। यतः खग्रासग्रहणे एव जनाः स्वस्थानं विस्मृत्य मुग्धाः स्तब्धाश्च भवितुं शक्नुवन्ति। तदा अकस्मात् दिवसकाले एव निशासदृशः अन्धकारः लभ्यते। इदं खग्रासग्रहणमत्यल्पं यदा कदा एव च भवति। परन्त्वत्र वर्णितं खग्रासग्रहणमत्यन्तं भीतिदर्शकं विस्मयोत्पादकं वा नास्ति। अनेन अनुमीयते यत्तस्मिन्काले जनाः ग्रहणविषये पूर्वपरिचिता आसन्। शंकरबालकृष्णदीक्षितप्रभृतयः[3] विद्वांसः तथैवामनन्तीति।

3. इन्द्र! त्वं स्वर्भानोः मायायाः ध्वंसकः इति वर्णनेनानुमीयते यत् तदा ग्रहणकालविषये इन्द्रोऽपि किंचिज्ज्ञानं अवश्यमेव धारयति स्म परन्तु तुरीयब्रह्मणा अत्रिः तमाच्छादितं सूर्यं प्राप्तवानिति वर्णनेन स्पष्टं यत् केवलं अत्रिकृतग्रहणस्य स्पर्शमोक्षादिकालस्योद्घोषणा एव सफला जाता। सम्भवतः इन्द्रः अत्रेः ग्रहणकालानयने सहायतामकरोत् परन्तु ग्रहणगणिते अत्रेः एव वैदुष्यं, तस्य ग्रहणगणितस्य दृगैक्यता च सिध्यति। मन्त्रस्यान्तिमेऽपि कथितं यत् अत्रयस्तम् अवविन्दन् इह अन्ये अशक्नुवन् अर्थात् अत्रीणामतिरिक्तं अन्यः कश्चन स्पर्शादिकालानयने समर्थः नाभवत्। अत्रय इति बहुवचनप्रयोगेण अत्रिकुलोत्पन्नानां विदुषाम् अत्रिशिष्याणां चाभिप्रायः दृश्यते। सम्भवतः तदा अत्रिगुरुकुलस्य ज्योतिर्गणितविषये प्रसिद्धिरासीत्।

4. तत्रात्रिगुरुकुले ग्रहगणितस्य दृगैक्यता ज्ञानार्थं वेधशालायां यन्त्रादीनां प्रयोगः भवति स्मेति सम्भावना प्रबला अस्ति यतः तुरीयब्रह्म शब्दस्यात्र प्रयोगः दृश्यते। शब्दस्यास्य प्रथमोऽभिप्रायः यत् समाध्यवस्थायां अत्रिणा 'यत्पिण्डे तद्ब्रह्माण्डे' इत्यनुसारं ग्रहणकालादिज्ञानं प्राप्तम् । अपरोऽभिप्रायो यत् तुरीययन्त्रेण अत्रिणा ग्रहणकालादिज्ञानं कृतम्। ज्योतिषशास्त्रेऽपि तुरीययन्त्रस्य प्रयोगो भवति। अनेन ग्रहस्य नतांशादीनां साधनं क्रियते। उभौ आशयौ समीचीनौ दृश्येते परन्तु द्वितीयाशयस्य सम्भावनाधिका यतः अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरपमाया अधुक्षत् अर्थात् आकाशे सूर्यस्य प्रकाशस्थाने अत्रिः चक्षुं स्थापयित्वा स्वर्भानोः मायाम् अघुक्षत् इत्यनेन वेधप्रक्रियायाः वर्णनं परिलक्ष्यते। **ग्राव्णो ब्रह्मा युयुजानः** इत्यत्र प्रस्तरवेधशालायाः योजना सम्भाव्यते। प्रसंगेऽस्मिन् दाहालमहोदयस्य विचारोऽस्ति यत्- "अत्र हि सूर्यस्य राहुणाऽऽच्छादनमुक्तम्। तस्य चात्रिणा प्रकाशनं जनेषु। चन्द्रमा हि अत्रेर्नेत्रसमुत्थत्वेन स्मर्यते 'अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः' इत्यादौ। तेन हि 'अत्रिः सूर्यस्य दिवि चक्षुरागात् स्वर्भानोरपमाया अधुक्षत्' इति कथनेन चन्द्रपातस्य द्वितीयस्य संकेतोऽत्र लभ्यते। पश्चाद्वर्तिशास्त्रेषु राहुकेतुशब्दो पर्यायत्वेन निर्विशेषमपि प्रयुक्तौ दृश्येते। अत्र हि खग्रास-सूर्यग्रहणस्य प्रसंगो दृश्यते यद्धि यदा कदैव घटते। सूर्यग्रहणं ह्यमावास्यायामेव भवति। ऐतरेय ब्राह्मणे हि अमावस्यायां चन्द्रः सूर्यं प्रविशतीत्युक्तमपि दृश्यते। तेन हि सूर्यग्रहणं हि चन्द्रमसा सह सम्बद्धं भवतीति तदाऽपि ज्ञातमासीत्"।[4]

5. अत्र कुत्रापि न वर्णितं यत् स्वर्भानुः अर्थात् राहुः सूर्यमग्रसदिति। यद्यपि इयं कल्पना वैदिककालादनन्तरं प्रबला जातेति। उपर्युक्तमन्त्रे स्वर्भानुरिति शब्दस्यार्थं चन्द्रं मत्वा पं0 रघुनन्दनशर्ममहोदयस्य मतमस्ति यदत्र मन्त्रस्यार्थः ' हे सूर्य ! त्वां चन्द्रः येनांधकारेण आवृतं करोति, तेन रेखागणितानभिज्ञजनाः मुग्धाः भवन्ति ' इति।[5]

स्वर्भानुरिति शब्दस्यार्थः चन्द्रः मया कोषादिग्रन्थेषु कुत्रापि न प्राप्तः, प्रायः अस्याशयः राहुरेव तथापि यदत्र 'अक्षेत्रविद्' शब्दस्य रेखागणितानभिज्ञः इत्यर्थः गृहीतः तत्तु समीचीनं प्रतीयते यतः रेखागणितस्यापरं नाम क्षेत्रगणितमप्यस्ति। ज्योतिषशास्त्र एव रेखागणितस्य प्रयोगो भवति अतः अक्षेत्रविदिति शब्दस्यार्थः परोक्षरूपेण ज्योतिषशास्त्रानभिज्ञोऽपि भवितुमर्हति। अपि च ज्योतिर्विद् ग्रहणस्य कारणं, तस्य कालादिकं च पूर्वमेव जानाति। अतः ग्रहणं दृष्ट्वापि तस्य मनसि भयं नोत्पद्यते। ऋषिरत्रिरस्य प्रत्यक्षमुदाहरणमस्ति। एवमेव ताण्ड्यब्राह्मणे पंचस्थलेषु[6] स्वर्भानुकृतसूर्यग्रहणस्य वर्णनं समुपलभ्यते। तेषु द्वयोः स्थलयोः कथितमस्ति यत् अत्रिः भासा अर्थात् स्वतेजसा स्वर्भानुकृतान्धकारस्य नाशं कृतवान्। देवा अन्धकारस्य नाशका इति शेषस्थलेषु वर्णितमस्ति। गोपथब्राह्मणे[7] स्वर्भानुना कृतं सूर्यग्रहणस्य वर्णनमस्ति, यस्यापनोदनं अत्रिणा कृतम्। शतपथब्राह्मणे[8] सूर्यग्रहणे सोमरुद्राभ्यां तमोऽपनोदनं निगदितमस्ति । सम्भवतः तदा सोमरुद्राभ्यां प्रतिपादिता ग्रहणानयनपद्धतिः दृगैक्यतां धारयति स्मेति। अथर्ववेदे ग्रहणकालिकबिम्बवर्णस्य वर्णनमनुमीयते। यथा- **उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।पश्याम त्वा सवितारं यमाहूरजसा ज्योतिर्यदविन्ददत्रिः।।** [9]

अत्र सूर्यग्रहणकाले सूर्यबिम्बं रजसावृतं जातम्, यस्य पुनराप्तिः अत्रिणाऽभवदिति वर्णितं दृश्यते। अर्थात् ग्रहणे सूर्यबिम्बं कृष्णवर्णः। तथैव प्रत्यक्षोपलब्धिरपि। ताण्ड्यब्राह्मणे ग्रहणबिम्बस्य वर्णविषये निम्नाख्यानं प्राप्यते - **स्वर्भानुर्वा आसुर आदित्यन्तमसाविध्यत्तं देवा न व्यजानँस्तेऽत्रिमुपधावँस्तस्यात्रिर्भासा तमोपाहन्यत् प्रथममपाहन् सा कृष्णाविरभवद्यदद्वितीयं सा रजता यत्तृतीयं सा लोहिनी यया वर्णमभ्यतृणत्सा शुक्लासीत्।।** [10]

उपर्युक्तवर्णनं ग्रहणस्य कालज्ञाने देवानामसमर्थतां प्रदर्शयति । यदा ते अत्रेः पार्श्वे गत्वा प्रार्थितवन्तः तदा अत्रिः स्वभासा तमोपाहन्यदर्थात् स्वग्रहणगणितज्ञानेन मोक्षादिकाल- मुक्तवान् । सर्वप्रथमं अत्रिणा बिम्बस्य कृष्णवर्णं दूरीकृतम्। तदनन्तरं रजोयुक्तः, तत्पश्चाच्च लोहितः बिम्बवर्णः जातः। ग्रहणानन्तरं बिम्बवर्णः शुक्लोऽभवत्। वर्णनमिदं पूर्णचन्द्रग्रहणे चन्द्रबिम्बस्य वर्णानां सम्भाव्यते यतोहि चन्द्रग्रहणमध्यकाले अर्धाधिकग्रासे बिम्बः कृष्णवर्णः, अर्धाल्पग्रासे रजोयुक्तः अर्थात् धूम्रवर्णः, मोक्षकालतः प्राक् लोहितवर्णः, ग्रहणस्य मोक्षकाले च शुक्लवर्णो दृश्यते। अतः प्रथमं तेन ग्रहणमध्यकालसमाप्तिज्ञानं कृतम्। तदोन्मीलनकालस्य तत्पश्चाच्च मोक्षकालज्ञानं कृतमिति। वस्तुतः वर्णद्वयसंयोगेन अपरो वर्ण उत्पद्यते। चन्द्रग्रहणे ग्राह्यग्राहकयोरेककक्षत्वात् वर्णयोर्योगेन अपरः नूतनवर्णः दृश्यते। तत्र भूच्छाया कृष्णवर्णा चन्द्रश्च शुक्लवर्णः। यदार्धाधिकग्रासस्तदा चन्द्रबिम्बे शुक्लभागो न्यूनः कृष्णांशोऽधिकः। अतश्चन्द्रः कृष्णवर्णस्य परिलक्ष्यते। यदाल्पग्रासस्तदा कृष्णभागो न्यूनः श्वेतांशोऽधिकः। अतस्तदा कृष्णश्वेतवर्णयोः संयोगेन धूम्रवर्णो दृश्यते। मोक्षोन्मुखं चन्द्रबिम्बं सूर्यस्य कानिचन किरणानि स्पृशन्ति फलतः तस्मिन् काले बिम्बस्य वर्णः ईषद्रक्तत्वयुक्तः कृष्णः अर्थात् लोहितवर्णः दृश्यते। मोक्षादनन्तरं चन्द्रबिम्बं शुक्लतां धारयति। सूर्यसिद्धान्तेऽपि प्रायः एतादृशमेव वर्णनं लभ्यते।यथा चन्द्रग्रहणे चन्द्रबिम्बस्य वर्णः- **अर्धादूनं सधूमं०्र स्यात्० कृष्णमर्धाधिके भवेत् ।विमुंचतः कृष्णताम्रं कपिलं सकलग्रहे।।**[11] परन्तु ऋचः पूर्वार्धे स्वर्भानुर्वा आसुर आदित्यन्तमसा- विध्यतदिति वर्णनमस्ति अर्थादत्र सूर्यग्रहणस्य चर्चा अस्तीति स्पष्टं संलक्ष्यते। ततः कथं पूर्वे चन्द्रग्रहणे चन्द्रबिम्बवर्णवर्णनस्य सम्भावना

प्रकटीकृता। सत्यं, परन्तु सूर्यग्रहणे एतादृशी स्थितिः न भवति यतः तत्र ग्राह्यग्राहकौ विभिन्नकक्षौ भवतः। अतस्तद्वर्णयोः संयोगो न भवति । येन सूर्यग्रहणे सूर्यबिम्बं सदा कृष्णं भवति। यथोक्तं ग्रहलाघवे - **धूम्रः कृष्णः पिंगलोऽल्पार्धसर्वग्रस्तश्चन्द्रोऽर्कस्तु कृष्णः सदैव।।**12 अपि च सम्भाव्यते यत् सूर्यग्रहणकालस्य पक्षानन्तरं यच्चन्द्रग्रहणं दृश्यमानमभवत्तस्यापि सहैव वर्णनमत्राभवत्। वेदेषु कुत्रचित् स्थलेषु देवाः ग्रहणान्धकारस्य नाशकाः कथिताः सन्ति। अत्र वर्णितं यत् ते देवा न व्यजानन्। तत्र देवशब्दस्याभिप्रायः सूर्यरश्मिरिति दीक्षितमहोदयस्य मतमस्ति।13 सूर्यरश्मिश्चन्द्रमा गन्धर्वः14 अर्थात् चन्द्रः सूर्यकिरणैः प्रकाशितं भवति। यतः चन्द्रग्रहणकाले सूर्यकिरणैः चन्द्रः न प्राप्तः, अतः रात्रौ अप्रत्यक्षसूर्यं स्वर्भानुः तमसावृतमकरोदिति कल्पना सम्भवतः तदा जाता। भूच्छाया चन्द्रमाच्छादयतीति ज्ञानं सम्भवतः तदा नासीत्। वैदिकवाङ्मये स्पष्टरूपेण चन्द्रग्रहणस्य वर्णनं कुत्रापि न प्राप्यते। यदि वैदिकजनाः सूर्यग्रहणस्य विषये पर्याप्तज्ञानं धारयन्ति स्म तदा कथं सम्भाव्यते यत् ते चन्द्रग्रहणस्य विषये अनभिज्ञाः आसन्? वस्तुतः ग्रहणस्य कारणं तस्य स्पर्शमोक्षादिकालविषयेऽपि च वैदिककाले सुदृढं ज्ञानमासीत्। सूर्यं स्वर्भानुः तमसा विदध्यादर्थात् राहुः सूर्यग्रहणस्य कारक इति राहुकृत- ग्रहणस्य कल्पना वैदिककालादेव दृश्यते। 'स्वर्भानुः तमसा विध्यदासुरः' इत्यनेन स्वर्भानोस्तमसश्च पार्थक्यमपि सिध्यति। सम्भवतः तदा अत्रिकुलोत्पन्नानां विदुषाम् अत्रिशिष्याणां वा ग्रहणगणितं दृगैक्यतां धारयति स्म। ग्रहणकाले ग्रहबिम्बस्य वर्णकथनं ग्रहणस्य सूक्ष्माध्ययनस्य निरीक्षणस्य च परिचयं ददाति। यद्यपि वेदेषु ग्रहणविषये सूक्ष्मविवेचनं नोपलभ्यते तथापि तत्रोपलब्धोल्लेख एव तज्ज्ञत्वस्य प्रमाणभूतः। वैदिककाले ग्रहगणितज्ञस्य समाजे सुप्रतिष्ठाऽऽसीत्। अतएव ''प्रज्ञानाय नक्षत्रदर्शम्15'' ''यादसे गणकम्16'' इत्यादयः वेदेषूपलभ्यन्ते। वस्तुतः वेदेषु समस्तज्ञानविज्ञानस्य मूलतÿवं प्राप्यते। अत एव वेदानां वेदत्वमिति।

## पादटिप्पणी -

1. ऐ.ब्रा. 40/5
2. ऋ. सं. 5/40/5-9
3. भा.ज्यो.-दीक्षित (हि.अनु.) पृ.84-85
4. उद्धृतं भा. ज्यो. इति.-दाहालः पृ. 33, 34
5. वैदिक सम्पत्ति - पं रघुनन्दनशर्मा पृ0 330-331
6. ता. ब्रा., 6/6/8, 14/11/14,15 , 4/5/2 , 4/6/13 एवं 23/16/2
7. गो. ब्रा. 8/19
8. श. ब्रा. 5/3/22
9. अ.सं. 13/2/2/36
10. ता. ब्रा. 6/6/8

11. सूर्यसिद्धान्त छेद्यकाधिकार श्लोक 23
12. ग्रहलाघव सूर्यग्रहणाधिकारः श्लोक 6।
13. भा.ज्यो.-दीक्षित (हि.अनु.) पृ.85
14. तै.सं. 3/4/7/1
15. वा.सं. 30/10
16. तत्रैव 30/20